International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2025; 11(2): 105-107
© 2025 IJSR
www.anantaajournal.com
Received: 10-02-2025
Accepted: 03-03-2025

**डॉ० गौरव आर्य**
प्रवक्ता, सियाराम इण्टर कॉलेज गागलहेड़ी, सहारनपुर, उत्तर प्रदेश, भारत

**Corresponding Author:**
**डॉ० गौरव आर्य**
प्रवक्ता, सियाराम इण्टर कॉलेज गागलहेड़ी, सहारनपुर, उत्तर प्रदेश, भारत

# वर्णोच्चारणशिक्षादृष्ट्या वर्णोत्पत्तिविज्ञानम्

**डॉ० गौरव आर्य**

**प्रस्तावना**
अथ समलञ्चकार प्रकृतिनिर्मितौ भाषया मनुजं परमकारुणिको परेशः। सा च तत्र वैदिकी प्रथमा, नित्या, प्रकृतिरूपेतरभाषाणाञ्च। यथा वेदव्यासः –

“अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।।”[1]

इयमेव कारणं सकलकलाकलापस्य, हेतुर्भूतव्यवहारस्य, प्रकृतिर्विकृतीनां, मूलममूलोत्कर्षस्य, कारयित्री सर्वकार्याणां, भावयित्री सर्वभावानां, धारयित्री धीधरधौरेयाणां, चोदयित्री च विपश्चिताम्। नाऽनया विना शक्यं मनुष्येण कर्तुमीषदपि व्यवहारस्य। अत एवोक्तं दण्डिना –

“इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।”[2]

भर्तृहरिणाऽपि –

“अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।”[3]

प्रतिप्राणभृन्नियतेयञ्च बहुधा भिन्ना खगकगस्थलगेष्विति भाषावैज्ञानिकाः। तत्र मानवीया भाषा समेभ्योऽपि स्वेतरभाषाभ्यो भिन्नोत्कृष्टा वैज्ञानिकी च विद्यते। इयञ्च भाषा वाक्यात्मिका। वाक्यञ्च तत्र योग्यताऽऽकांक्षाऽऽसत्तियोगात्मकः पदसन्निपातः। यथा चोक्तम् –

“वाक्यं स्याद्योग्यताऽऽकाङ्क्षाऽऽसत्तियुक्त पदोच्चयः”[4] इति।

पदञ्च वर्णनिचयो वर्णो वाऽर्थबोधनक्षमः प्रातिपदिकेतरः।
तथाहि –

“वर्णाः पदं प्रयोगार्हा अनन्वितैकार्थबोधकाः”[5] इति।

तत्र को वर्णः किञ्च तस्त्स्वरूपमिति जिज्ञासायामाऽऽह वर्णोच्चारणशिक्षाकारः –

“अक्षरं नक्षरं विद्यादश्नोतेर्वा सरोऽक्षरम्।
वर्णं वाऽऽहुः पूर्वसूत्रे किमर्थमुपदिश्यते।।”[6] इति।

अर्थात् वर्णमक्षरं वा नक्षरं नित्यमिति विद्यात् अथवा यत् चराचरं जगद्व्याप्नोति तदक्षरमश्नोतेः। वर्णाश्चाकारककारादयो त्रिषष्टिः पाणिनिसम्मताः[7] "शब्दः प्रकृतिः सर्ववर्णानाम्"[8] इति नयेन वर्णोच्चारणज्ञानावगमनायावश्यकं तावच्छब्दस्वरूपज्ञानं पूर्वम्। शब्दः खलु ध्वनिः। ध्वनिश्चायं नादरूपो वायुमार्ग आकाशदेशीयः श्रोत्रेण गृह्यते। ध्वनेरेव स्पष्टरूपः ककारादयो वर्णाः। ततश्चायं शब्दो स्पष्टरूपो वर्णोऽस्पष्टरूपश्च ध्वनिरित्युदीर्यते। यथा महाभाष्यकारः –

"येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स

**शब्दः"[9]** इत्यत्र गोमनुष्यादिजातिविशेषप्रत्यायनप्रभवाः गकारमकारादयो ध्वनिविशिष्टाः स्वरूपविशेषयुक्ता एव शब्दत्वेनोच्यन्ते। पुनश्च –

"अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते यथा मा शब्दं

**कार्षीः"[10]** इत्यत्रास्पष्टस्वरूपाः ध्वनयः क्रियाविशेषावगमनक्षमाः पदार्थप्रतीतिदुर्बला एव शब्दत्वेनोच्यन्ते यथा रोदनं, जृम्भणं, मेघादिगर्जनम्। वस्तुतस्तु तत्रापि रोदनादौ भ्रमरशब्दादौ वा अस्ति वर्णस्वरूपं मूले किन्तु न तद् स्पष्टतयावभासते न च पदार्थप्रतीतिप्रबल अत एव ध्वनिमात्रं तत्। न्यायवैशेषिकमते तु शब्दस्वरूपमेवमुक्तम् –

"श्रोत्रग्राह्यो गुणः शब्दः, आकाशमात्रवृत्तिः"[11]

अर्थात् शब्दः गुण आकाशश्च गुणी। आकाशस्य गुणिनः नित्यत्वात् तद्गतगुणोऽपि नित्यः, यतोहि गुणगुणिनोः समवायसम्बन्धो भवति। स च शब्दः द्विधा विभज्यते वर्णत्वेन ध्वनित्वेन च। यथाह –

"स च द्विधा वर्णातमको ध्वन्यात्मकश्चेति। तत्र वर्णात्मकः संस्कृतभाषादिरूपः, ध्वन्यात्मको भेर्यादौ।"[12]

एवं किल वर्णो ध्वनिश्च शब्दस्यैव स्पष्टरूपस्यास्पष्टरूपस्य च भेदद्वयम्। पुनः शब्दस्य स्वरूपं ब्रूवन्नाह वर्णोच्चारणशिक्षाकारः –

"श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः"[13] इति।

अत्र खलु शब्दस्य श्रोत्रेणोपलब्धिः प्राप्तिर्भवति, बुद्ध्या च तत्स्वयपं गृह्यते, प्रयोगेण संघर्षणरूपेण सोऽभिज्वलति अर्थादुत्पद्यते, आकाशे च तिष्ठतीति शब्दस्य विशेषतोक्ता। इदानीं च कथं वायुस्तस्यमार्गः मूलो वा, कथं च वर्णो ध्वनिश्च शब्दपर्यायावित्युच्यते –

"आकाशवायुप्रभवः शरीरात् समुच्चरन् वक्त्रमुपैति नादः।
स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः।।"[14]

अर्थात् आकाशवायुसंसर्गेण शरीरस्थो नादः वक्त्रमुपैति अथवा वायुरेव शरीरस्थो वक्त्रमुपेत्य नादो भवतीति। स च नादः स्थानान्तरेषु जिह्वादिना तत्स्थाने संघर्षणाद् वर्णत्वमुपैति। स च वर्णो मूलरूपे शब्द एव। ध्वनिरेवानुपलब्धस्थानविशेषसंघर्षः शब्दो भवति। स एव चाभ्यन्तरबाह्यप्रयत्नविशेषैः करणद्वारा च वर्णत्वमागच्छति। अयमत्र निष्कर्षः यत् यदि वायुना कस्यचित् करणस्य पदार्थविशेषस्य संघर्षो न भवति न तावत् शब्दोत्पत्तिसम्भवः। यदि हि विवृते मुखे वायुः निरवरोधो प्रविशति निःसरति चेन्न शब्दो ध्वनिर्वोत्पद्यते किन्तु तत्कृते जिह्वादिद्वारा वायुसंघर्षमावश्यकम्। इदानीं भाषामूलस्य वर्णस्य मनुष्येतरासम्भवस्य कथमाविर्भाव इति प्रस्तूयते –

"आत्मा बुद्धया समेत्यार्थान् मनो युङ्क्ते विवक्षया,
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।
मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्।।"[15]

अर्थात् जीवात्मा शरीरेशोऽर्थान् विवक्षया वक्तुमीप्सया बुद्ध्या समेत्य मनो युङ्क्ते प्रेरयति। मनस्तत्त्वमेतदुभयेन्द्रियं खलु। मनश्चेतदर्थेषु नियोजयतीन्द्रियाणि। तथा च मन इन्द्रियकृतार्थान् बुद्धयै प्रयच्छति, बुद्धिश्चात्मने, समञ्च निर्देशनक्रमः, जीवात्मा बुद्धिं, बुद्धिर्मनः, मनश्चेन्द्रियग्रामं ततश्चार्थावगमः। यथाऽऽह –
"इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः।
मनसश्च परा बुद्धिर्बुद्धेरात्मा महान् परः।।"[16] इति।

तच्च मन कायाग्निं प्रेरयति, स च कायाग्निः शरीरस्थमारुतं प्रेरयति। अत्र मारुतशब्देन केचन् उदानं मन्यन्ते अपरे च प्राणम्। अत्रर्गप्रातिशाख्यकृता तु प्राणं मन्यते। स च प्राणवायुः उरसि हृदयस्थले विचरन् कण्ठप्रदेशमागतो मन्द्रं स्वरं जनयति वर्णविशेषाकाररहितम्। यतोहि, तत्रस्थस्वरतन्त्रिकया बाह्यप्रयत्नमेव क्रियते येन तस्मिन् नादे घोषाघोषविवारश्वासादिवैशिदष्ट्यमेवोपपद्यते। वर्णविशेषाकारस्तु तस्याभ्यन्तरप्रयत्नसामर्थ्यवशाद्भवति। उक्तञ्च –

"वायुशरीरसमीरणात् कण्ठोरसोः सन्धाने"[17]

इति सूत्रभाष्ये यत् "वायोः शरीरैः समस्तस्य ईरणात् कण्ठस्योरसश्च सन्धाने शब्दस्योत्पत्तिर्भवति" इति। पुनः कण्ठगतस्य प्राणवायोः शब्दत्वे कथं भिन्नाकाराः वर्णाः जायन्त इति जिज्ञासायामाऽऽह –

"अनुप्रदानात्संसर्गात् स्थानात्करणविन्ययात्।
जायते वर्णवैशेष्यं परिमाणाच्च पञ्चमात्।।"[18] इति।

तत्र खलु कण्ठस्थस्वरतन्त्रिकया शब्दरूपो प्राणवायुः कण्ठे विवृते श्वासो भवति संवृते च नादः। यथा च शौनकः –

"वायुः प्राणः कोष्ठ्यमनुप्रदानं कण्ठस्य खे विवृते संवृते वा।
आपद्यते श्वासतां नादतां वा वक्त्रीहायाम्।।"[19] इति।

एवं नाभिप्रदेशोत्थो वायुः कण्ठे श्वासो वा नादो वा भवति। एतौ च श्वासनादौ वर्णानां मूलकारणौ भवतः। उक्तञ्च –

"ताः वर्णानां प्रकृतयो भवन्ति"[20]

इति। तत्र अघोषवर्णानां श्वासो घोषाणाञ्च नादः कारणम्। एते च बाह्यप्रयत्नाः सन्ति। प्रयत्नश्च द्वेधा – बाह्याभ्यन्तरभेदात्। तत्र वर्णनिष्पत्तौ प्रयत्नकरणस्थानानां विशेषोपयोगिता वर्तते। के च त इति जिज्ञासायामाऽऽह वर्णोच्चारणशिक्षाकारः –

"प्रयत्नं प्रयत्नः"[21]

अर्थात् वर्णनिष्पत्तौ शारीरिकक्रियाविशेषो प्रयत्नः।

"येन निर्वृत्यते तत्करणम्"[22]

येन माध्यमेन वर्णानां निर्वर्तनं भवति सिद्धिर्भवति तत्करणम्। तच्च जिह्वा भवति। यतोहि जिह्वाग्रोपाग्रमध्यान्तभागैरेव स्थानेषु वायुसंघर्षणद्वारा वर्णविशेषाकारप्राप्तिर्भवति। पुनः –

"यत्रस्था वर्णा उपलभ्यन्ते तत्स्थानम्"[23]

अर्थात् यत्र करणमाध्यमेन पूर्वस्थितानां वर्णानां निष्पत्तिर्प्राप्तिः प्रकाशनं वा भवति तत्स्थानं भवति। प्रत्येकवर्णः स्वोच्चारणस्थाने स्थितो भवति तत एव तस्योच्चारणसम्भव न इतरतस्तस्मात् अत एव "यत्रस्था" इत्युक्तं मुनिना। एवं किल मूर्द्धस्थाने जिह्वोपाग्रेण करणेनाभ्यन्तरे स्पृष्टे प्रयत्ने सति विवृते कण्ठे

श्वासतोऽघोषस्याल्पप्राणस्य टकारस्योत्पत्तिर्भवति, तत्रैव महाप्राणत्वे ठकारस्य, तत्रैव नादतो घोषस्याल्पप्राणस्य डकारस्य, तत्रैव महाप्राणत्वे ढ़कारस्योत्पत्तिर्भवति। एवं किल भिन्नस्थानेषु भिन्नप्रयत्नादिभिर्भिन्ना-भिन्ना वर्णा उत्पद्यन्ते। पुनः वर्णोत्पत्तिं विचारयन्नाऽऽह वर्णोच्चारणशिक्षाकारः –

"नाभिप्रदेशात् प्रयत्नप्रेरितः प्राणो नाम वायुरूर्ध्वमाक्रामन्नुर आदीनां स्थानानामन्यतमस्मिन् स्थाने प्रयत्नेन विचार्यते"[24]

इति। अर्थात् सामान्यगतिर्भवति हृदयपर्यन्तं वायोः किन्तु शब्दत्वे सति तस्य कण्ठस्थ-स्वरतन्त्रिकया पुनः स्थानविशेषेष्वेव वर्णविशेषरचनाया विचारः क्रियते। तत्र च स्पर्शवर्णानां यमानां चोत्पत्तौ तत्स्थाने वायोः लौहपिण्डवत् संयोगोऽपेक्ष्यते, अन्तस्थवर्णोत्पत्तौ दारुपिण्डवत्, ऊष्मवर्णोत्पत्तावूर्णापिण्डवच्च"[25]। एतेन खलु वायुपीड़नविशेषेण वर्णेषु विशेषाधानं भवति। तेषामुच्चारणं स्पष्टं भवति। एवं किल पाणिनिना वर्णोच्चारणविधानं समुपदिष्टम्।

**सन्दर्भ सूची**

1. महाभारत - 12.224.55
2. काव्यादर्श - 1.4
3. वाक्य, ब्रह्मः - 1
4. साहित्यदर्पण द्वितीय परिच्छेद।
5. साहित्यदर्पण द्वितीय परिच्छेद।
6. वर्णोच्चारणशिक्षा (महा०अ० 1/पा० 1/आ० 2)
7. वर्णोच्चारणशिक्षा - 7
8. तैत्तिरीयप्रातिशाख्यम् - 22.1
9. महाभाष्यं पस्पशाह्निकम्।
10. महाभाष्यं पस्पशाह्निकम्।
11. तर्कसंग्रहः।
12. तर्कसंग्रहः।
13. वर्णोच्चारणशिक्षा-6 (महा०अ० 1/पा० 1/सू० 2/आ० 2)
14. वर्णोच्चारणशिक्षा-3
15. वर्णोच्चारणशिक्षा-4
16. कठोपनिषद् - 1.3.10
17. तैत्तिरीयप्रातिशाख्यम् - 2.2
18. तैत्तिरीयप्रातिशाख्यम् - 23.2
19. ऋग्वेदप्रातिशाख्यम् शिक्षापटलम् सूत्र - 1
20. ऋग्वेदप्रातिशाख्यम् शिक्षापटलम् सूत्र - 3
21. वर्णोच्चारणशिक्षा-8.4
22. वर्णोच्चारणशिक्षा-8.3
23. वर्णोच्चारणशिक्षा-8.2
24. वर्णोच्चारणशिक्षा-8.5
25. वर्णोच्चारणशिक्षा-5.1